श्री विष्णु स्तोत्रं (शिवपुराणे)

श्री विष्णु स्तोत्रं (शिवपुराणे)

देवा ऊचुः |
हृषीकेश महाबाहो भगवन् मधुसूदन |
नमस्ते देवदेवेश सर्वदैत्यविनाशक || 1 ||

मत्स्यरूपाय ते विष्णो वेदान्नीतवते नमः |
सत्यव्रतेन सद्राज्ञा प्रलयाब्धिविहारिणे || 2 ||

कुर्वाणानां सुराणां च मंथनायोद्यमं भृशं |
बिभ्रते मंदरगिरिं कूर्मरूपाय ते नमः || 3 ||

नमस्ते भगवन्नाथ क्रतवे सूकरात्मने |
वसुंधरां जनाधारां मूर्धतो बिभ्रते नमः || 4 ||

वामनाय नमस्तुभ्यमुपेंद्राख्याय विष्णवे |
विप्ररूपेण दैत्येंद्रं बलिं छलयते विभो || 5 ||

नमः परशुरामाय क्षत्रनिःक्षत्रकारिणे |
मातुर्हितकृते तुभ्यं कुपितायासतां द्रुहे || 6 ||

रामाय लोकरामाय मर्यादापुरुषाय ते |
रावणांतकरायाशु सीतायाः पतये नमः || 7 ||

नमस्ते ज्ञानगूढाय कृष्णाय परमात्मने |
राधाविहारशीलाय नानालीलाकराय च || 8 ||

नमस्ते गूढदेहाय वेदनिंदाकराय च |
योगाचार्याय जैनाय बौद्धरूपाय मापते || 9 ||

नमस्ते कल्किरूपाय म्लेच्छानामंतकारिणे |
अनंतशक्तिरूपाय सद्धर्मस्थापनाय च || 10 ||

नमस्ते कपिलरूपाय देवहूत्यै महात्मने |
वदते सांख्ययोगं च सांख्याचार्याय वै प्रभो || 11 ||

नमः परमहंसाय ज्ञानं संवदते परं |
विधात्रे ज्ञानरूपाय येनात्मा संप्रसीदति || 12 ||

वेदव्यासाय वेदानां विभागं कुर्वते नमः |
हिताय सर्वलोकानां पुराणरचनाय च || 13 ||

एवं मत्स्यादितनुभिर्भक्तकार्योद्यताय ते |
सर्गस्थितिध्वंसकर्त्रे नमस्ते ब्रह्मणे प्रभो || 14 ||

आर्तिहंत्रे स्वदासानां सुखदाय शुभाय च |
पीतांबराय हरये ताक्ष्र्ययानाय ते नमः |
सर्वक्रियायैककर्त्रे शरण्याय नमो नमः || 15 ||

दैत्यसंतापितामर्त्यदुःखादिध्वंसवज्रक |
शेषतल्पशयायार्कचंद्रनेत्राय ते नमः || 16 ||

कृपासिंधो रमानाथ पाहि नः शरणागतान् |
जलंधरेण देवाश्च स्वर्गात् सर्वे निराकृताः || 17 ||

सूर्यो निस्सारितः स्थानाच्चंद्रो वह्निस्तथैव च |
पातालान्नागराजश्च धर्मराजो निराकृतः || 18 ||

विचरंति यथा मर्त्याः शोभंते नैव ते सुराः |
शरणं ते वयं प्राप्ता वधस्तस्य विचिंत्यतां || 19 ||

इति श्रीशिवपुराणे रुद्रसंहितायां युद्धखंडे षोडशोऽध्याये सर्वदेव कृत श्री विष्णु स्तोत्रं ||